1 ● RF(A)/100/3309

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45 ]
Total No. of Questions : 45 ]

**ಸಂಕೇತ ಸಂಖ್ಯೆ: 16-S**

**Code No. : 16-S**

# A

**CCE RF**
**UNREVISED**
**FULL SYLLABUS**

Question Paper Serial No. **100**

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : First Language — SANSKRIT
## प्रथमभाषा — संस्कृतम्

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh)**

ದಿನಾಂಕ : 31. 03. 2023 ] [ Date : 31. 03. 2023
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-45 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-45 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे वस्तुनिष्ठाः विषयनिष्ठाश्च पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. विषयनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

[ Turn over

इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

**Tear here**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'आनन्दः' अस्य समानार्थकपदम् इदं भवति ।

   (A) धननन्दः (B) सन्तोषः

   (C) आत्मजः (D) सानन्दः

2. 'स्वाधीनः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) पराधीनः (B) आधीनः

   (C) अन्तर्धानः (D) दैवाधीनः

3. 'विद्वान्' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) करोषि (B) महिषी

   (C) विदुषी (D) विद्वांसः

4. 'भविष्यति' अत्र एषः लकारः वर्तते ।

   (A) लट्लकारः (B) लिट्लकारः

   (C) लुट्लकारः (D) लृट्लकारः

5. 'भारते' अत्र एषा विभक्तिः वर्तते ।

(A) प्रथमाविभक्तिः (B) सप्तमीविभक्तिः

(C) चतुर्थीविभक्तिः (D) पञ्चमीविभक्तिः

6. भाग्यानि <u>काले</u> फलन्ति । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कदा (B) कति

(C) कथम् (D) कीदृशी

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. इदं जगत् – ईशावास्यम् :: कस्यस्विद्धनम् – .........................।

8. सुरुचिः – उत्तमः :: सुनीतिः – ........................ ।

9. दधीचिः – महर्षिः :: वृत्रासुरः – ........................... ।

10. कर्णः – अङ्गराजः :: शल्यः – ........................... ।

[ Turn over

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. कः भूमिं परितः प्रदक्षिणं करोति ?

12. भारतमाता कैः पूजिता ?

13. भोजः कुत्र हन्तव्यः ?

14. नाट्ये कति रसाः स्मृताः ?

15. के मुहुर्मुहुः परिभवं प्राप्नुवन्ति ?

16. तृषितः चकोरः कम् आश्रयति ?

17. रमणमहर्षेः सहजानि आभरणानि कानि ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. दधीचेः तपोवनं कथम् आसीत् ?

19. कविः कीदृशीं मातरं नमामि इति वदति ?

20. कैः षड्भिः निदानैः रोगाः सम्भवन्ति ?

21. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) ततस्ततः ।

b) भवतीति ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) यथाबलम् ।

b) चक्रपाणिः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) विषं कण्ठे यस्य सः =

b) दिनं दिनं प्रति =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) छात्रः अध्येतुं शालां गच्छति ।

b) सेवकः ग्रामं गतवान् ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) कपयः फलानि खादन्ति ।

b) त्वया किं खाद्यते ?

**VI. संस्कृतभाषया अनुवादं कुरुत । 1 × 2 = 2**

26. ಮಾನವರು ಪುಣ್ಯದ ಫಲವನ್ನು ಇಚ್ಛಿಸುತ್ತಾರೆ. ಆದರೆ ಪುಣ್ಯವನ್ನು ಇಚ್ಛಿಸುವುದಿಲ್ಲ. ಪಾಪದ ಫಲವನ್ನು ಅಪೇಕ್ಷಿಸುವುದಿಲ್ಲ. ಪ್ರಯತ್ನಪಟ್ಟು ಪಾಪವನ್ನು ಮಾಡುತ್ತಾರೆ.

People expect good return for their deeds. But they do not like to do good deeds. They do not wish to get punished for their bad deeds. But they indulge in bad deeds.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत । 1 × 2 = 2**

27. उद्योग पुरुषलक्षणम् । उद्योगेनैव सर्वं सिध्यति । अतः वयम् उद्योगिनः भवामः ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत । 4 × 3 = 12**

28. "लीलावती इति ग्रन्थे बहवः विषयाः निरूपिताः खलु" ।

कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

**अथवा**

"याचको भूत्वा अत्र अहम् आगतः" ।

कः पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

29. "शरणागतरक्षणं धर्मः इति अस्माकं श्रद्धा" ।

कः पाठः ? का अवदत् ? शरणागतः कः ?

30. "सागर इव तिष्ठतु ते यशः" ।

कः पाठः ? कः अवदत् ? कस्य यशः ?

31. "प्रशास्त्यस्य केसरी नाम वै पिता" ।

कः पाठः ? कः अवदत् ? केसरी कस्य पिता ?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. बल्लाळसेनः ।

33. वेदव्यासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. यथा नद्यः स्यन्दमानाः

समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान् नामरूपाद्विमुक्तः

परात्परं पुरुषमुपैति दिव्यम् ।।

35. बालार्काभिमुखो बालो बालार्क इव मूर्तिमान ।

गृहीतुकामो बालार्कं प्लवतेऽम्बरमध्यगः ।।

36. आङ्गिको वाचिकश्चैव आहार्यः सात्विकस्तथा ।

चत्वारोऽभिनयाह्येते विज्ञेया नाट्यसंश्रयाः ।।

**अथवा**

धीरोद्धतो धीरललितो धीरोदात्तस्तथैव च ।

धीरप्रशान्तश्चैवेति नायकाः नाटकाश्रयाः ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. मधुरं मधु पोयूषं तस्मात्तस्मात् कवेर्वचः ।

**अथवा**

ज्ञानामृतं पीत्वा तुष्टः ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. मनीषिणः सन्ति न ते हितैषिणः ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. उत्साह ..........................................................................................

..........................................................................................।

..........................................................................................

.......................................................................................... हेतोः ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. डा० सत्यव्रतशास्त्रिमहोदयस्य बाल्यजीवनं विवृणुत ।

41. भीष्मयुधिष्ठिरयोः संवादं सङ्गृह्य लिखत ।

42. अमरनाथगुहाविषये का पुराणकथा अस्ति ?

**अथवा**

भगवान् रमणमहर्षिः महर्षित्वं स्वजीवनेन दर्शितवान्, विवृणुत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. भारतीयेतिहासे सुसमृद्धं वैभवोपेतञ्च विजयनगरसाम्राज्यम् । तत्र बहवः राजानः स्वयं काव्यज्ञाः कवीनाम् आश्रयदातारः च अभवन् । तेषु सङ्गमवंशीयः राजा बुक्कोऽपि अन्यतमः । एषः कवीनां पोषकः आसीत् । बुक्कस्य पुत्रः वीरकम्पणः । तस्य भार्या एव गङ्गादेवी । एषा प्रतिभासम्पन्ना शीलवती च आसीत् । सा स्वचातुर्येण सरसोक्त्या पाण्डित्येन च वीरकम्पणस्य प्रीतिपात्रम् अभवत् । अस्याः जन्मस्थानं पित्रोः विषयः वा स्पष्टतया नोपलभ्यन्ते । तथापि एषा सामान्यपरिवारे सञ्जाता इति केचनविमर्शकाः कथयन्ति ।

**प्रश्नाः**

i) बुक्कस्य पुत्रः कः ?

ii) विजयनगरसाम्राज्यं कीदृशम् आसीत् ?

iii) गङ्गादेवी कथं वीरकम्पणस्य प्रीतिपात्रम् अभवत् ?

iv) बुक्कस्य वंशस्य नाम किम् ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. धारवाडमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा जन्मदिनोत्सवनिमित्तं दिनद्वयस्य विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं पितरं/मातरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. राष्ट्रियोत्सवः ।

**अथवा**

परिसरसंरक्षणम् ।